# shrIvenkaTeshavijayastotram

# શ્રીવેઙ્કટેશવિજયસ્તોત્રમ્

## Document Information

Text title : shrIveMkaTeshavijayastotram

File name : veMkaTeshavijayastotram.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : December 19, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશવિજયસ્તોત્રમ્

દૈવતદૈવત મઙ્ગલમઙ્ગલ પાવનપાવન કારણકારણ ।
વેઙ્કટભૂધરમૌલિવિભૂષણ માધવ ભૂધવ દેવ જયીભવ ॥ ૧॥

વારિ[દસન્નિભ]દેહ દયાકર શારદનીરજચારુવિલોચન ।
દેવશિરોમણિઅપાદસરોરુહ વેઙ્કટશૈલપતે વિજયીભવ ॥ ૨॥

અઞ્જનશૈલનિવાસ નિરઞ્જન રઞ્જિતસર્વજનાઞ્જનમેચક ।
મામભિષિઞ્ચ કૃપામૃતશીતલશીકરવર્ષિદૃશા જગદીશ્વર ॥ ૩॥

વીતસમાધિક સારગુણાકર કેવલસત્ત્વતનો પુરુષોત્તમ ।
ભીમભવાર્ણવતારણકોવિદ વેઙ્કટશૈલપતે વિજયીભવ ॥ ૪॥

સ્વામિસરોવરતીરરમાકૃતકેલિમહારસલાલસમાનસ ।
સારતપોધનચિત્તનિકેતન વેઙ્કટશૈલપતે વિજયીભવ ॥ ૫॥

આયુધભૂષણકોટિનિવેશિતશઙ્ખરથાઙ્ગજિતામતસમ્મત ।
સ્વેતરદુર્ઘટસઙ્ઘટનક્ષમ વેઙ્કટશૈલપતે વિજયીભવ ॥ ૬॥

પઙ્કજના[નીનિલયા]કૃતિસૌરભવાસિતશૈલવનોપવનાન્તર ।
મન્દ્રમહાસ્વનમઙ્ગલનિર્ઝ્ઝર વેઙ્કટશૈલપતે વિજયીભવ ॥ ૭॥

નન્દકુમારક ગોકુલપાલક ગોપવધૂવર કૃષ્ણ [પરાત્પર] ।
શ્રીવસુદેવ જન્મભયાપહ વેઙ્કટશૈલપતે વિજયીભવ ॥ ૮॥

શૈશવપાતિતપાતકિપૂતન ધેનુકકેશિમુખાસુરસૂદન ।
કાલિયમર્દન કંસનિરાસક મોહતમોપહ કૃષ્ણ જયીભવ ॥ ૯॥

પાલિતસઙ્ગર ભાગવતપ્રિય સારથિતાહિતતોષપૃથાસુત ।
પાણ્ડવદૂત પરાકૃતભૂ[ભર પાહિ] પરાવરનાથ પરાયણ ॥ ૧૦॥

શાતમખાસુવિભઞ્જનપાટવ સત્રિશિરઃખરદૂષણદૂષણ ।
શ્રીરઘુનાયક રામ રમાસખ વિશ્વજનીન હરે વિજયીભવ ॥ ૧૧॥

રાક્ષસસોદરભીતિનિવારક શારદશીતમયૂખમુખામ્બુજ ।
રાવણદારુણવારણદારણકેસરિપુઙ્ગવ દેવ જયીભવ ॥ ૧૨॥

કાનનવાનરવીરવનેચરકુઞ્જરસિંહમૃગાદિષુ વત્સલ ।
[શ્રીવર]સૂરિનિરસ્તભવાદર વેઙ્કટશૈલપતે વિજયીભવ ॥ ૧૩॥

વાદિસાધ્વસકૃત્સૂરિકથિતં સ્તવનં મહત્ ।
વૃષશૈલપતેઃ શ્રેયસ્કામો નિત્યં પઠેત્ સુધીઃ ॥ ૧૪॥

॥ ઇતિ શ્રીવેઙ્કટેશવિજયસ્તોત્રમ્ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

---

*shrIvenkaTeshavijayastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*